## 'अ' -भागः – बहुविकल्पात्मकाः प्रश्नाः (अङ्काः-40)

**1. अधोदत्तवाक्येषु रेखाङ्कितपदस्य सन्धिपदं सन्धिच्छेदपदं वा प्रदत्तविकल्पेभ्यः चिनुत -**

**(केवलं प्रश्नचतुष्टयम्)**

(i) षट् मासानां समूहः **षण्मासः** इति कथ्यते ।

(क) षट् + मासः (ख) षटः + मासः (ग) षड् + मासः

(ii) मम गृहस्य समीपे **दिक् + अम्बरस्य** देवालयः अस्ति ।

(क) दिकम्बरस्य (ख) दिगम्बरस्य (ग) दिगबरस्य

(iii) पिताऽस्य किं **तपस्तेपे** ।

(क) तपः + तेपे (ख) तप + तेपे (ग) तपो + तेपे

(iv) यानानां **पङ्क्तयः + ह्यनन्ताः** ।

(क) पङ्क्तयह्यनन्ताः (ख) पङ्क्तयो ह्यनन्ताः (ग) पङ्क्तयः ह्यनन्ताः

(v) मनुष्यरूपेण **मृगाः + चरन्ति** ।

(क) मृगाचरन्ति (ख) मृगाश्चरन्ति (ग) मृगास्चरन्ति

**2. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत ।**

**(केवलं प्रश्नचतुष्टयम्)**

(i) **राष्ट्रपक्षी** मयूरः अस्ति ।

(क) राष्ट्रे पक्षी (ख) राष्ट्रात् पक्षी (ग) राष्ट्रस्य पक्षी

(ii) न्यायाधीशः तं जनं **सम्मानेन सहितम्** उक्तवान् ।

(क) सम्मानसह (ख) ससम्मानम् (ग)ससम्मानेन

(iii) तस्मिन्नेव काले **व्याघ्रचित्रकौ** अपि जलपानाय आगतौ ।

(क) व्याघ्रः चित्रकौ च (ख) व्याघ्रौ चित्रकौ च (ग) व्याघ्रः च चित्रकः च

ODM EDUCATIONAL GROUP
Changing your Tomorrow

(iv) प्रतिदिनं **यथाशक्ति** कार्यं कुरु ।

(क) शक्तिम् अतिक्रम्य (ख) शक्तिम् अनतिक्रम्य (ग) शक्तिम् अनुसारम्

(v) मन्त्री **वाचि पटुः** भवेत् ।

(क) वागपटुः (ख) वाकपटुः (ग) वाक्पटुः

**3. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चिनुत । (केवलं प्रश्नचतुष्टयम्)**

(i) विद्वांस एव लोकेऽस्मिन् **चक्षुष्मन्तः** प्रकीर्तिताः ।

(क) चक्षुष् + तवत् (ख)चक्षुष् + मतुप् (ग)चक्षुष् + क्तवतु

(ii) **विद्वत्वं** सर्वत्र पूज्यते ।

(क) विद्वस् + त्व (ख) विद्वान् + त्व (ग) विद्वस् + त्वम्

(iii) **श्रद्धा + मतुप्** लभते ज्ञानम् ।

(क) श्रद्धावन्तः (ख) श्रद्धावत् (ग) श्रद्धावान्

(iv) **विचित्र + टाप्** दैवगतिः ।

(क) विचित्रता (ख) विचित्रताः (ग) विचित्रा

(v) सर्वेषां मत्कृते **महत् + त्व** विद्यते ।

(क) महत्त्वं (ख) महत्ता (ग) महत्त्वः

**4. वाच्यस्य नियमानुगुणम् उचितं विकल्पं चिनुत । (केवलं प्रश्नत्रयम्)**

(i) __________ देशसेवा क्रियते ।

(क) सेवकाः (ख) सेवकैः (ग) सेवकः

(ii) अहं चलच्चित्रं __________ ।

(क) पश्यति (ख) पश्यते (ग) पश्यामि

(iii) आपणात् त्वया_________ आनीयन्ते ।

(क) पाठ्यपुस्तकम् (ख) पाठ्यपुस्तकानि (ग) पाठ्यपुस्तकम्

(iv) तै: _________अवगम्यते ।

(क) आङ्लभाषा (ख) आङ्लभाषाम् (ग) आङ्लभाषया

**5. प्रदत्तेभ्य: विकल्पेभ्य: चित्वा कालबोधकशब्दै: अधोलिखित दिनचर्यायां रिक्तस्थानानि पूरयत - (केवलं प्रश्नचतुष्टयम्)**

(i) प्रात: (7.30) _________ प्रार्थना सभा अस्ति ।

(क) सार्ध सप्तवादने (ख) सार्ध सप्तवादनम् (ग) अर्ध सप्तवादनम्

(ii) प्रात: (10.00) _________ अर्धावकाश: भवति ।

(क) दशं वादने (ख) दश वादने (ग) दशवादनम्

(iii) मध्याह्ने (11.45) _________ विविधा: क्रीडा: आयोज्यन्ते ।

(क) पादोन द्वादशवादने (ख) पादोन-एकादशवादने (ग) एकादशवादने

(iv) मध्याह्ने (1.15) _________ वादने पूर्णावकाश: भवति ।

(क) सपाद-एकम् (ख) सपाद-एक (ग) पाद-एकम्

(v) छात्रा: (1.30) _________ वादने गृहं गच्छन्ति ।

(क) सार्ध द्वि (ख) सार्ध-एक (ग) सपाद-एक

**6. वाक्यानुगुणम् उचिताव्ययपदं प्रदत्तविकल्पेभ्य: चिनुत – (केवलं प्रश्नत्रयम्)**

(i) त्वां विना अहम् _________न स्थास्यामि ।

(क) कुत: (ख) अत्र (ग) इतस्तत:

(ii) मम पिता_________ वाराणसीं गमिष्यति ।

(क) श्व: (ख) ह्य: (ग) कदा

(iii) __________ अहम् आगच्छामि तर्हि आवां गच्छाव: ।

(क) श्व: (ख) यदि (ग) तर्हि

(iv) अम्बा पुत्रं पृच्छति- __________ त्वं कुत्र आसी: ?

(क) श्व: (ख) अद्य (ग) ह्य:

**7. अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति । शुद्धं पदं विकल्पेभ्य: चिनुत -**

**(केवलं प्रश्नत्रयम्)**

(i) भवान् कुत्र **गच्छसि** ?

(क) गच्छति (ख) गच्छन्ति (ग) गच्छामि

(ii) दूरत: **पर्वतानि** रम्या: ।

(क) पर्वत: (ख) पर्वता: (ग) पर्वतम्

(iii) ते सर्वे सत्यं **वदति** ।

(क) वदेत् (ख)वदथ: (ग) वदन्ति

(iv) पुरा आतङ्कवाद: अस्माकं देशे न **भविष्यति** ।

(क) अस्ति (ख) आसीत् (ग)भवति

ODM EDUCATIONAL GROUP
Changing your Tomorrow

## 'अ' -भागः — बहुविकल्पात्मकाः प्रश्नाः (अङ्काः ४०)

**8. अधोदत्तवाक्येषु रेखाङ्कितपदस्य सन्धिपदं सन्धिच्छेदपदं वा चिनुत -(केवलं प्रश्नचतुष्टयम्)**

(i) उद्यमेन हि सिध्यन्ति कार्याणि न च मनोरथैः ।

(क) मन + रथै (ख) मनः + रथैः (ग) मनो + रथैः

(ii) मम गृहस्य समीपे दिक् + अम्बरस्य देवालयः अस्ति ।

(क) दिम्बरस्य (ख) दिकम्बरस्य (ग) दिगम्बरस्य

(iii) कीटः+अपि सुमन सङ्गात् शिरसि आरोहति ।

(क) कीटोऽपि (ख) कीटापि (ग) कीटपि

(iv) वसुन्धरा एवं जगन्माता कथ्यते ।

(क) जगद् + माता (ख) जगति + माता (ग) जगत् + माता

(v) मूर्खाः+ च मूर्खैः सुधियः सुधिभिः ।

(क) मूखास्च (ख) मूर्खाश्च (ग) मूर्खाष्च

**9. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत ।**
**(केवलं प्रश्नचतुष्टयम्)**

(ii) काकः क्रोधेन सहितम् प्रविश्य अवदत् ।

(क) क्रोधसहम् (ख) सक्रोधम् (ग) क्रोधसहित

(ii) भारतभूमिः वीरजननी अस्ति ।

(क) वीरात् जननी (ख) वीराणां जननी (ग) वीरे जननी

(v) सुखदुःखयोः समभावः भवेत् ।

(क) सुखे दुःखे (ख) सुखस्य च दुःखस्य च (ग) सुखेषुः दुःखेषु

(iv) एतत् स्थानं निर्जनम् अस्ति ।

(क) जनात् अभावः (ख) जनेषु अभावः (ग) जनानाम् अभाव (तत्)

(v) ततः सभां कुशः च लवः च प्रविशताम् ।

(क) कुशलवयोः (ख) कुशलवौ (ग) कुशलवे

**10. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चिनुत । (केवलं प्रश्नचतुष्टयम्)**

(i) न कालस्य बन्धुत्वम् अस्ति ।

(क) बन्धु त्व (ख) बन्धु त्वम् (ग) बन्धु तल्

(ii) मम कार्येण माता प्रसन्न + टाप् अस्ति ।

ODM EDUCATIONAL GROUP Changing your Tomorrow

(क) प्रसन्ने (ख) प्रसन्नः (ग) प्रसन्ना

(iii) छात्र जीवने परिश्रमस्य महत्त्वं वर्तते ।

(क) महत् + ङीप् (ख) महत् + त्व (ग) महत् + तल्

(iv) पठनेन एव नरः गुण + मतुप् भवति ।

(क) गुणवान् (ख) गुणवन्तौ (ग) गुणवन्तः

अथवा

अध्यापकस्य एषः शिष्यः निष्ठावान् अस्ति ।

(क) निष्ठा + क्तवतु (ख) निष्ठा + मतुप् (ग) निष्ठा + तल्

**11. वाच्यस्य नियमानुगुणम् उचितं विकल्पं चिनुत । (केवलं प्रश्नत्रयम्)**

(i) मया दुग्धम् ........................ ?

(क) पिबामि (ख) पीयते (ग) पिबति

(ii) अहम् ........................गच्छामि ।

(क) विद्यालयम् (ख) विद्यालयात् (ग) विद्यालयः

(iii) ............... गीतं गीयते ।

(क) गीताम् (ख) गीतया (ग) गीता

(iv) छात्रैः .................... पठ्यते ।

(क) पाठम् (ख) पाठः (ग) पाठस्य

ODM EDUCATIONAL GROUP Changing your Tomorrow

**12.प्रदत्तेभ्यः विकल्पेभ्यः समुचितं कालबोधकशब्दं चिनुत - (केवलं प्रश्नचतुष्टयम्)**

(i) सूर्यांशः प्रातः (7.00) _________ वादने व्यायामं करोति ।

(क) सप्त (ख) अष्ट (ग) सपाद-सप्त

(ii) सः सायंकाले (5.30) _________ वादने भ्रमणाय गच्छति ।

(क) पादोन-पञ्च (ख) सार्ध-पञ्च (ग) पञ्च

(iii) गृहम् आगत्य सः (6.45) _________ वक्षे दूरदर्शनम् पश्यति ।

(क) पादोन-सप्त (ख) पादोन-षट् (ग) पादोन-अष्ट

(iv) सूर्यांशः (8.15) _________ वादने भोजनं करोति ।

(क) अष्ट (ख) पादोन-अष्ट (ग) सपाद-अष्ट

(v) रात्रौ (10.00) _________ वादनम् यावत् पठति ।

(क) अष्ट (ख) नव (ग) दश

**13. वाक्यानुगुणम् उचिताव्ययपदं चिनुत – (केवलं प्रश्नत्रयम्)**

(i) कुपित: जनक: __________ वदति ।

(क) शनै: (ख) उच्चै: (ग) यावत्

(ii) अम्बा पुत्रम् पृच्छति__________ त्वम् कुत्र आसी: ?

(क) श्व: (ख) हय: (ग) अद्य

(iii) __________ मित्रम् आगमिष्यति तदा आवाम् खेलिष्याव: ।

(क) कदा (ख) सदा (ग) यदा

(iv) यदि अहं कृष्णवर्ण: __________ त्वं किं गौराङ्ग: ।

(क) तदा (ख) तर्हि (ग) यावत्

**14. अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति । शुद्धं पदं विकल्पेभ्य: चिनुत - (केवलं प्रश्नत्रयम्)**

(i) इदानीम् त्वं किं कुर्वन्ति ?

(क) करोमि (ख) कुर्म: (ग) करोषि

(ii) अयम् कन्या अतीव गुणवती ।

(क) इदम् (ख) इयम् (ग) इमाम्

(iii) छात्रा: हय: भ्रमणाय गच्छन्ति ।

(क) श्व: (ख) कदा (ग) अधुना

(vi) मम मित्र: बुद्धिमान् अस्ति ।

(क) मित्रम् (ख) मित्र (ग) मित्रे

ODM EDUCATIONAL GROUP
Changing your Tomorrow

**पठितावबोधनम् (अङ्का: १५)**

**15. रेखाङ्कितपदानि आधृत्य समुचितं प्रश्नवाचकपदं चिनुत - (केवलं प्रश्नपञ्चकम्)**

(i) सुराधिप: ताम् अपृच्छत् ।

(क) क: (ख) कौ (ग) किम्

(ii) उभौ शवं चत्वरे स्थापितवन्तौ ।

(क) के (ख) कुत्र (ग) क:

(iii) तत्वार्थम् निर्णय: विवेकेन कर्तुम् शक्यम् ।

(क) केन (ख) कया (ग) कस्मै

(iv) न्यायाधीश: अतिथिम् ससम्मानं मुक्तवान् ।

(क) क: (ख) कम् (ग) कथम्

(v) मयूरस्य पिच्छानाम् सौन्दर्यम् अपूर्वम् अस्ति ।

(क) काम् (ख)केषाम् (ग) कस्या:

(vi) महानगरेषु वाहनानाम् अनन्ता: पङ्क्तय: धावन्ति ।

(क) कुत: (ख) केषाम् (ग) कुत्र/केषु

**16. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकुलम् उचितार्थं चिनुत - (केवलं प्रश्नचतुष्टयम्)**

(i) बहि: अन्त: जगति तु बहुशुद्धिकरणम् ।

(क) धरायाम् (ख) संसारे (ग) शुचि

(ii) स: व्याघ्र: तथा कृत्वा काननं ययौ ।

(क) कर्णम् (ख) कङ्कणम् (ग) वनम्

(iii) वृषभ: पृथिव्याम् अपतत् ।

(क) भूमौ (ख) संसारे (ग) शरीरे

(iv) मृगा: मृगै: सह व्रजन्ति ।

(क) भ्रमन्ति (ख) धावन्ति (ग) गच्छन्ति

(v) वानर: वृक्षात् वृक्षं कूर्दति ।

(क) कर: (ख)मर्कट: (ग) तुरङ्ग:

**17. भाषिककार्यसम्बद्धनां प्रश्नानां समुचितम् उत्तरं विकल्पेभ्य: चिनुत - (केवलं प्रश्नषट्कम्)**

(i) चौरस्य पादध्वनिना अतिथि: प्रबुद्ध: । 'प्रबुद्ध' इति क्रियापदस्य कर्तृपद किम् ?

(क) चौरस्य (ख) पादध्वनिना (ग) अतिथि:

(ii) 'सुखानि' अस्य विशेषणम् पदं किम् ?

(क) श्रेय: (ख) अहितम् (ग) प्रभूतानि

(iii) 'प्रविष्ट:' इति क्रियापदस्य कृर्तपदम् किम् अस्ति ?

(क) गृहम् (ख) रात्रौ (ग) कश्चन

(iv) न कातर: इति स्थाने किम् पदं प्रयुक्तम् ?

(क) अनकातर: (ख) आकातर: (ग) अकातर:

(v) 'भार्या' इति पदस्य विशेषणम् किम् ?

(क) तस्य (ख)बुद्धिमती (ग) बुद्धिमान्

(vi) 'अहम् एव योग्य:' अत्र अहम् पदं कस्मै प्रयुक्तम् ?

ODM EDUCATIONAL GROUP Changing your Tomorrow

(क) काकाय (ख) पिकाय (ग) गजाय

(vii) 'नीचैः' इति पदस्य विपर्ययः पदं किम्?

(क)उच्चैः (ख) सर्वैः (ग) तैः

(viii) 'सहायकः' इत्यर्थे किं पदं प्रयुक्तम्?

(क) त्रिदशाधिपः (ख)विनिपातः (ग) नायकः